No. ४४६३

Title वास्तु शान्ति प्रयोग:

Author ×

Extent २ Age ×

Subject धर्मशास्त्र

वास्तुशान्तिप्रयोगः

५५७३

5573/2

॥ श्रीगणेशाय नमः ॥ सुमुख नमः ॥ ॥ स्वस्ति श्रीमदाहवस्य च्चित्सुखितानंदस्य ब्रह्मणोऽनिर्वाच्यमायाशक्ति-
विजृंभिताऽविद्यायोगात्कालकर्मस्वभावाविर्भूतमहत्तत्वोदिताहंकारत्त्रीयोद्भूतवियदादिपंचकें-
२। द्रियदेवतानिर्मितांडकटाहे चतुर्दशलोकात्मके लीलया तन्मध्यवर्त्तिनो भगवतः श्रीनारायणस्य ना-
भिकमलोद्भूतसकललोकपितामहस्य ब्रह्मणः सृष्टिं कुर्वतः [illegible] तस्तद्धरणाय च प्रजापतिप्रार्थितस्य
महापुरुषस्य सितवाराहावतारेणाध्रियमाणायामस्यां धरित्र्यां भूर्ल्लोकसंज्ञितायां सप्तद्वीपमंडिता-
यां क्षारोदाद्यष्टिद्विगुणद्वीपवलीकृतलक्षयोजनविस्तीर्णजंबूद्वीपे स्वर्गस्थितामराशाद्यो सिताव-
तारे गंगादिसरिद्भिः पाविते भारते वर्षे निखिलजनपावनपरमभागवतोत्तमशौनकादिवसति-
के नैमिषारण्ये ब्रह्मावर्तैकदेशे जनपदे कर्मभूमौ स्वाम्यवति कुरुक्षेत्रादिमध्ये रेखायाः पूर्वदिग्भा-
गे उमारिकाक्षेत्रांतर्वर्तिनि धनुषाकारगंगावधिवरणासीमध्यस्थितपंचक्रोशात्मके अविमुक्ते वा-
राणसीक्षेत्रे आनंदवने श्रीमद्विश्वेश्वरपालितराजधान्यां समस्तनंदिभृंग्यादिभिर्गणैः कालभैर-
वादिभिरशेषामरैर्व्यासादिभिः समस्तऋषिभिः सेवितायां प्रवेशमात्रादनेकजन्मार्जिताशेषाघौ-

घनिवृत्तिकारिण्यां ईप्सितफलदायिन्यां महानद्याः श्री उत्तरवाहिन्या गंगायाः पश्चिमे कूले श्रीमद्भगव
तो महापुरुषस्य अशेषपराक्रमस्य श्री विष्णोराज्ञाप्रवर्त्तमानस्य सर्वसर्वकल्याणवती पुण्यसाधन
भूमौ अस्मिन्महायतने शुभे मंडपे गोमयेनोपलिप्तप्रदेशे अस्मिन्वकूलयोरतस्थितानां विश्वेश्व
राहिसमस्तदेवतानां विष्णोब्रह्मणानां च संनिधौ एवं गुणविशिष्टे पुण्यवृक्षे देशे च श्री [illegible]भगव
तो मार्त्तंडस्य क्रियया कालत्रितयस्य गर्गवराहमिहिराचार्यादिभिर्गणितायां संख्यायां श्रीमंनारा
यणनाभिकमलोद्भूतसर्वजगत्स्रष्टुः परार्द्धद्वयजीविनो ब्रह्मणो द्वितीये परार्द्धे रथंतरादित्रिं
शत्कल्पानां मध्ये अष्टमे श्वेतवराहकल्पे चतुर्द्दशमन्वंतराणां मध्ये पंचाशताधिके वर्षे प्रथममा
से प्रथमपक्षे प्रथमदिवसे अह्नो द्वितीययामे तृतीयमुहूर्त्ते सप्तमे स्वायंभुवः स्वारोचिषउत्तम
तामसरैवचाक्षुषेतिषण्मन्वन्तनामतिक्रांतानां अतिक्रम्यमाणे संप्रति सप्तमे वैवस्वतमन्वंतरे
युगानां त्रिघ्नेजाते अष्टाविंशतितमे कलियुगे प्रथमचरणे संवत्सराणां व्यतिक्रांतायां चतुःसा ॥वृद्धत्र०॥
हस्र्यां सप्तशत्यधिकायां तदुपरि व्यतिक्रममाणे श्रीमंनृपविक्रमार्क्कसमयातीतबार्हस्पत्याब्दे ॥२१॥

मानेनसंवत्सरसप्तदशशतयथासंख्याधिकृतमेष्टायतनेप्रवर्त्तमानेतदंतरगतशालिवाहनशकृतःए
तावदधिकृपंचदशशतगतेऽष्टेचांऽद्रसावनसौरनक्षत्रादिभ्रमितप्रभवादिषष्टिसंवत्सराणांमध्येऽ
१ सं अमुकनाम्निवत्सरेअमुकशावत्संबितश्रीमन्मार्त्तंडमंडलेअमुकऋतौअमुकमासेअमुकपक्षे
अमुकतिथौअमुकवासरेअ०नक्षत्रेअ०योगेअ०करणेअ०स्थेचंद्रेअ०स्थेसवितरिअ०देवगुरौ
शेषेषुग्रहेषुयथास्थानस्थितेषुसत्सुएवंगुणविशिष्टेपुण्यकालेदेशेचममसभार्यस्यसकुटुं
बस्यसपुत्रस्यसमित्रस्यसपशोःअस्मिन्नूतननगृहेआचंद्रार्कक्षितिकालंयावत्पुत्रपौत्रादिप्र
पौत्रादीनांवंशपरंपरयासुखेननिवासार्थंगृहवासप्रारंभनिमित्तंदेहेमायुरारोग्यसिद्ध्यापशु
भ८ पुत्रपरमैश्वर्यसुखादिप्राप्त्यर्थंअग्निविद्युत्त्रिविधोत्पातपदपातकदोषनिवृत्त्यर्थंअलक्ष्मीविना
शनार्थंदशविधलक्ष्मीश्रीफलप्राप्त्यर्थंकुसुंदरीवस्थितपार्वत्याशवलिताऽनिर्वाच्याऽस्थसा
दियुगयुक्तेस्यश्रीविश्वेश्वरस्यप्रसन्नार्थंशिखादिपंचचत्वारिंशद्वास्तुदेवतानांआदित्यादिन
वानांचग्रहाणांप्रीत्यर्थंआदित्यादिनवग्रहस्थचितसर्वबाधोपशांत्यर्थंदुष्टदुष्टस्थानस्थित

आदित्यादिनवग्रहकृतदुरिष्टमालापीडोपशांत्यर्थं आदित्यादिनवग्रहमखयुतवास्तुशांतिमहं कु

॥ इति वास्तुशांतिप्रयोगः संपूर्णः ॥ ॥ सं० १७२५ व० पौषशुदि २ गुरौ लि० ब्रा० सूरजी सुत माधवजी रस्तु ॥

२८

॥ दुष्प्र ॥ १० ॥
॥ २ ॥